**अट्टहास** ( aṭṭa–hāsa ) *adj.* having a roaring laughter तेन शुक्लाष्टम्यां श्वेतचन्दनमयो वज्रधरः कार्यः अट्टहासः सर्वालंकारविभूषितः GiMs. i. 58. 14.

**अट्टहासक** ( aṭṭahāsa–ka ) *m.* **1** *Jasminum pubescens* कुन्दश्च मकरन्दश्च …तारपुष्पोऽट्टहासकः RājNi. 201. 12; **2** name of a leader of S'iva's attendants अट्टहासकः … इत्याद्यो गणेशानाः SkandP. iv. 85. 44.

**अट्टहासकुपित** ( aṭṭahāsa–kupita ) *adj.* enraged due to loud laughter तदाट्टहासकुपितः प्रोवाचाञ्चितशेखरः । …नन्दी भैरवविग्रहः RāmāMañ. 430. 7.

**अट्टहासकुसुम** ( aṭṭahāsa–kusuma ) *n.* the Jasmine flower कुन्दावदातैरट्टहासकुसुमवदुज्ज्वलैः comm. *on* YaśasCam. i. 253. 24.

**अट्टहासघोष** ( aṭṭahāsa–ghoṣa ) *m.* noise of loud laughter तस्याट्टहासघोषेण दिशः … स्फुटिता इव सर्वशः SkandP. iii(1). 8. 85.

**अट्टहासच्छल** ( aṭṭahāsa–cchala ) *n.* pretext of loud laughter अट्टहासच्छलेनास्यायस्य फेनौघपाण्डुराः । जगत्क्षय इवापीताः क्षरन्ति क्षीरसागराः Kāvy-Mī. 83. 9.

**अट्टहासच्छेद** ( aṭṭahāsa–ccheda ) *m.* peal of loud laughter प्रमथाधिनाथाः । भिन्दन्तु दानवचमूमधुनाट्टहासच्छेदा इव प्रलयकालनिशां स्मरारेः HarVi. 13. 74; और्वदहनस्य दर्शनाज्झटिति निःसृतैरट्टहासच्छेदैरिव कैलासविशदैः फेनराशिभिराशामुखानि धवलयन्तम्…अम्भोनिधिमपश्यम् TilaMañ. 122. 4.

**अट्टहासतरङ्ग** ( aṭṭahāsa–taraṅga ) *m.* wave of loud laughter हनुमता …दृष्टयैवाट्टहासतरङ्गैर्लङ्केशस्य…प्रतापाग्निः शमितः AuciViCa. 20(44)

**अट्टहासता** ( aṭṭahāsa–tā ) *f.* the state of Aṭṭahāsa (i. e. Yakṣa of that name) जाते सुते क्षीणशापः स संप्राप्तोऽट्टहासताम् BṛKathāMañ. ix. 1. 607.

**अट्टहासत्व** ( aṭṭahāsa–tva ) *n.* the state of being loud laughter यत्र फेनततित्वमपह्नुतं तत्रैवाट्टहासत्वोत्प्रेक्षणात् Kuval. 37(13)

**अट्टहासनिधन** ( aṭṭahāsa–nidhana ) *n.* death of Aṭṭahāsa ततो विकृतदंष्ट्राख्यो हर्षे विद्याधरेश्वरः । एत्याट्टहासनिधनक्रुद्धो बाणैरवाकिरत् KathāSaSāg. viii. 4. 69.

**अट्टहासनिनादिन्** ( aṭṭahāsa–ninādin ) *adj.* resounding with loud laughter ततः शिष्याः समुत्तस्थुरट्टहासनिनादिनः NarmaMā. 3. 84.

**अट्टहासपटल** ( aṭṭahāsa–paṭala ) *n.* peal of loud laughter अथोन्नादः — अथाकाण्डिकमट्टहासपटलं निर्माति धर्माम्बुभाक् चीत्कारं कुरुते … राधा माधवविप्रयोगरभसात् UjjvaNiMa. 557. 7.

**अट्टहासपुष्प** ( aṭṭahāsa–puṣpa ) *n.* *Jasminum pubescens* ( हेमन्त इव पल्लविताश्रितकुन्दकन्दलः … यशोर्धनामा क्षितिपतिः ) हेमन्तर्तुः कुन्दकन्दलानामट्टहासपुष्पलतानां पल्लवको भवति YaśasCam. (comm.) i. 210. 11.

**अट्टहासपूर्वम्** ( aṭṭahāsa–pūrvam ) *adv.* preceded by loud laughter तावत् स शवोऽट्टहासपूर्वमुत्तिष्ठन् सौन्धलेन प्रोचे PrabaCin. 21. 16.

**अट्टहासप्रिय** ( aṭṭahāsa–priya ) *adj.* fond of loud laughter अट्टहासप्रियाश्चैव भविष्यन्ति तदा नराः LiṅgaP. i. 24. 96; परिवर्ते विंशतिमे भविता व्यास गौतमः । तत्राट्टहासनामाहमट्टहासप्रिया नराः S'ivaP. iii. 5. 25 (299A. 8)

**अट्टहासभयानक** ( aṭṭahāsa–bhayānaka ) *adj.* terrific with loud laughter ( नृहरिम् ) गर्जन्तमतिगम्भीरमट्टहासभयानकम् । … ध्यात्वा ĪśānS'iPa. i. 35. 138.

**अट्टहासमहावज्र** ( aṭṭahāsa–mahāvajra ) *m. n.* great thunderbolt in the form of loud laughter अट्टहासमहावज्रदीर्णब्रह्माण्डमण्डलः ( क्षेत्रपालः ) BrahmāṇḍP. iii. 20. 59.

**अट्टहासमुखर** (aṭṭahāsa–mukhara) *adj.* resounding with loud laughter ( रावणः ) बन्दीकृतामरपतेर्जितपुष्पकस्य तस्याट्टहासमुखराणि मुखानि मेऽद्य । … भृगुबटुर्वदयं विपक्षः BālRā. 2. 46.

**अट्टहासमुच्** ( aṭṭahāsa–muc ) *adj.* emitting a loud sound योऽभूद्दीप्तशिखोऽग्निर्मे सोऽट्टहासमुचाधुना । सज्योतिर्धूमलेखोऽपि कालमेघेन नाशितः KathāSaSāg. xii. 6. 403.

**अट्टहासवचन** ( aṭṭahāsa–vacana ) *n.* words of Aṭṭahāsa (S'iva's attendant) इत्यट्टहासवचनादथ जृम्भमाणसंरम्भभीषणतरभ्रुकुटीविभङ्गम् । चण्डेश्वरेण … चेले HarVi. 13. 1.

**अट्टहासविकट** ( aṭṭahāsa–vikaṭa ) *adj.* terrible with loud laughter ( ताटका ) व्यादायाननमट्टहासविकटं दूरेण तारापथात्…उपक्रामति JānaPa. 1. 19.

**अट्टहासविभीषण** ( aṭṭahāsa–vibhīṣaṇa ) *adj.* frightening with loud laughter भूतैः परिवृतं नैकैरट्टहासविभीषणैः । … रूपं पाशुपतास्त्रस्य ĪśānS'iPa. ii. 12. 94.

**अट्टहासविलास** ( aṭṭahāsa–vilāsa ) *m.* display of loud laughter अट्टहासविलासैरिव व्योमव्योमकेशस्य … चैत्यालयैः … उपशोभितं राजपुरं नाम नगरम् YaśasCam. i. 21. 1.

**अट्टहासशब्द** ( aṭṭahāsa–śabda ) *m.* noise of loud laughter अट्टहासं भगवान् मुमोच शशिशेखरः । तेनाट्टहासशब्देन मोहयित्वा पितामहम् । …ब्रह्मणः पञ्चमं शिरः ( चकर्त ) SkandP. v(1). 2. 54.

**अट्टहाससमुद्गारिन्** ( aṭṭahāsa–samudgārin ) *adj.* disclosing through loud laughter तां ददर्श महादेवः ( दाक्षायणीम् ) । अट्टहाससमुद्गारितदूर्ध्वदन्तपङ्क्तिकाम् BṛDharmaP. i. 36. 67.

**अट्टहाससंबन्ध** ( aṭṭahāsa–sambandha ) *m.* relation with loud laughter उदजृम्भत ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासो महाकालः इत्यत्राप्राकरणिकमहाकालाख्यदेवताविशेषविषया प्रतीतिः साध्या । तस्याश्चाट्टहाससंबन्धः … साधनम् VyaktiVi. 119. 17.

**अट्टहाससहासत्विष्** ( aṭṭahāsasahāsa–tviṣ ) *f.* splendour of loud laughter उत्तानवक्त्रकुहरोत्थितयाट्टहाससहासत्विषा कलुषया बिभरांबभूवे । प्रेङ्खत्घनर्गलरसातलगर्भनिर्यदिन्दुप्रभाधवलशेषशरीरलक्ष्मीः HarVi. 7. 46.

**अट्टहासा** ( aṭṭahāsā ) *f.* name of Durgā महिषासुरप्रिये … । अट्टहासे … नमोऽस्तु ते MahāBhā. vi. App. i. 1(16); श्रीकालिका…दिगम्बरा चाट्टहासा … शतनाम इतीरितम् KāliViT. 5. 8.

**अट्टहासाख्य** ( aṭṭahāsākhya ) *adj.* called Aṭṭahāsa ( name of a S'ivaliṅga ) तद्दक्षिणेऽट्टहासाख्यं लिङ्गं सर्वसुखप्रदम् SkandP. iv. 97. 30; (name of a Yakṣa) एकदा च समं सख्या क्रीडन्ती कपिशभ्रुवा । अद्राक्षमट्टहासाख्यं कैलासे यक्षपुत्रकम् KathāSaSāg. xii. 6. 33.

**अट्टहासानुज** ( aṭṭahāsānuja ) *m.* younger brother of Aṭṭahāsa (a Yakṣa) अट्टहासानुजः सोऽहं यक्षो दीप्तशिखाभिधः BṛKathāMañ. ix. 1. 766.

**अट्टहासानुप्रास** ( aṭṭahāsānuprāsa ) *m.* replica of loud laughter तरुणकुमुदिनीनाथचूडाट्टहासानुप्रासः …रुचिरुपचिनुते चातुरीं यस्य S'rīKaC. 6. 64.

**अट्टहासाभिधान** ( aṭṭahāsābhidhāna ) *adj.* named Aṭṭahāsa (said of a Vidyādhara or Yakṣa) पूर्वं सुवाहोर्नृपतेर्विद्याधरपतेस्तथा । अट्टहासाभिधानस्य द्वन्द्वयुद्धमभूद् द्वयोः KathāSaSāg. viii. 4. 56; अट्टहासाभिधानस्त्वं कान्तो यक्षकुमारकः BṛKathāMañ. ix. 1. 600.

**अट्टहासिन्** ( aṭṭahās–in ) *adj.* [ *f.* –inī ] who laughs loudly सा च देवी…चतुःषष्टिस्वरूपा च शतरूपाट्टहासिनी SkandP. v(3). 14. 50; मुक्तकेशीं च नृत्यन्तीं विधवाम्…अपश्यं चाट्टहासिनीम् BrahmVaiP. iii. 34. 14; कश्चिदेको मषीश्यामो व्यात्तवक्त्रो नरसिंहवपुरट्टहासी…नखरैर्लोकं दारयितुं प्रववृते PrabaK. 95. 5; निर्ययुर्युगपदट्टहासिनः सङ्घशो युधि गणा मदोल्बणाः ( कपर्दिनः ) S'ivLī. 10. 78; *m.* **1** name of a Rākṣasa, son of Bhaṇḍa अट्टहासी महाशी च महाशीर्षः … इत्येवमादयः मम पुत्राः ( भण्डस्य ) BrahmāṇḍP. iii. 21. 88; **2** name of S'iva मृडोऽट्टहासी…शिवः AbhidhāCin. 197; मृत्युञ्जयः पिङ्गजटोऽट्टहासी KośaKaTa. 1. 318; ParaNāMā. 154.

**अट्टहासेन्दुरुच्** ( aṭṭahāsendu–ruc ) *f.* light of the moon in the form of loud laughter नतिरस्तु शैलतनयाविलासिने । … यस्याट्टहासेन्दुरुचा पयोऽब्धिलीलां दधाने लवणाम्बुराशौ । निद्राणनारायणनर्म धत्ते सेतुः YātrāPra. 5. 70.

**अट्टहासेश्वरतीर्थ** ( aṭṭahāseśvara–tīrtha ) [ pw. ]

**अट्टहासोज्ज्वल** ( aṭṭahāsojjvala ) *adj.* radiant with loud laughter वज्रकङ्कटसंछन्ना अट्टहासोज्ज्वलाः परे । …मुशुण्डिकाः BrahmāṇḍP. iii. 19. 76.

**अट्टहासोर्मि** ( aṭṭahāsormi ) *f. m.* wave of loud laughter विशदैस्तेनाट्टहासोर्मिभिः लङ्केशस्य विलङ्घितो दिशि दिशि क्रूरः प्रतापानलः RāmC. 15. 64 = SubhāRaK. 45. 11.

**अट्टहास्य** ( aṭṭahāsya ) *n.* loud laughter यौगन्धरायणः । स चकारात्मनः सद्यो रूपस्य परिवर्तनम् । बभूव तेन विकृतः कुब्जो वृद्धश्च तत्क्षणात् । उन्मत्तवेषः खल्वाटो हास्यसंजननः ( v. l. खल्वट्टहास्यसंजननः ) परम् KathāSaSāg. ii. 4. 5 ( Brockhaus Ed. 1839 )

[1]**अट्टा** ( aṭṭā ) *f.* overbearing conduct? [ MW. ]; committing of an excess [ Gold. ] ( शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ( क्यङ् ) अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणम् Vār. 1 (*on* P. iii. 1. 17, Bombay 1937 Ed.); अट्टा । अट्टायते MahāBh. ii. 26. 2 (*on* P. iii. 1. 17); [ a tent; boiled rice; अट्टा तु क्षौमगृहप्रभेदविपुलानार्द्रेषु भक्ते तथा KośaKaTa. 2. 4445 ]; *adj.* large, extensive, not wet, dry

[2]**अट्टा** ( aṭṭā ) *f.* name of a Buddhist minor deity तद्यथा…अट्टे मट्टे LaṅkāSū. 106. 6; अट्टे मट्टे स्वाहा KāśyaS. 200A. 7.

**अट्टाग्र** ( aṭṭāgra ) *n.* top of a turret केऽप्यारुरुहुरट्टाग्रं सौधाग्राणि च केचन MalliC. 5. 242.

**अट्टाट्टक** ( aṭṭāṭṭaka ) *adj.* very loud द्वे च स्त्रियौ तात मया दृष्टे च तत्र वै । …ते द्वे हास्यैरट्टाट्टकैः पुनः । भक्षेते च स्वमांसानि PadmP. ii. 93. 29.

**अट्टाट्टम्** ( aṭṭāṭṭam ) *adv.* very loudly धूर्जटिः … मुहुर्मुहुः श्वसन् घोरं हसन्नट्टाट्टमेव च । जगाम दक्षनिलयम् BṛDharmaP. i. 38. 16.